8.44; 'सर्वगन्धैः' चन्दनागुरुकस्तूरिकादिभिः Mitā. 99.12 (*on* 1.278); S'āraTi. 15.128; सुगन्धलेपताम्बूलकस्तूरीकुङ्कुमागुरु।…स्नाने पाने प्रदापयेत् Rasā. 18.200; चन्दनागुरुकुङ्कुमैः।…विलिखेत् यन्त्रराजम् MahNirvāT. 5.174; PañcSā. 3.4(2); PurāPraSaṁ. 92.14; KumāCaSaṁ. 20.25; नागपुष्पागुरुशीरकोलमज्जाम्बुचन्दनैः। लिप्ताङ्गः AnaṅgaRa. 7.47; (यन्त्राणि) चन्दनागुरुकर्पूरकस्तूरीकुङ्कुमैर्लिखेत् TantrRā. 8.30; ĀnandRa. 8.34; **4** the tree *Dalbhergia sissoo* पिच्छिलागुरुशिंशपाः AgniP. 362.34; AnekāSaṁ. 3.513; अगुरु द्वी शिंशपायाम् Nānārthā-Saṁ. ii. 60.157; MediK. 141.111; अगुरु स्याच्छिंशपायाम् VisvaLoK. 294.102; अगुरु स्यात्…शिंशपायाम् S'abdaRaSaK. 264.15.

**अगुरुक** (aguru-ka) *n.* aloe wood कस्तूरी कर्पूरं कुङ्कुमनखमांसिवालागुरुकं च। चन्दनगुडकं क्रमशो वर्धितभागं तु गृहवासः NāgaSa. 4.6; क्षीरधेनुं प्रवक्ष्यामि तां निबोध नराधिप।…सुवर्णमुखशृङ्गाणि चन्दनागुरुकाणि च CaturCin. i. 423.13; धूपितमगुरुकसिद्धं मधुगुडधूपैश्च मुखवासः S'ārṅgaP. 3250.

**अगुरुकर्दम** (aguru-kardama) *m.* the paste of aloe wood (राधा) लम्भितमृगनाभिमगुरुकर्दममनु दीना। ध्यायति शितिकण्ठम् StavMā. 279.9.

**अगुरुकाल** (aguru-kāla) *adj.* black as the resin of aloe (चन्दनम्) कालपर्वतकं रूक्षमगुरुकालम् ArthS'ā. i. 188.2 (2.11) (comm. अगुरुकालं अगुरुवत्कृष्णम्)

**अगुरुकाष्ठ** (aguru-kāṣṭha) *n.* the wood of aloe tree ततः संप्रेषयामास …। चन्दनागुरुमुख्यानि (v. l. चन्दनागुरुकाष्ठानि) MahāBhā. ii. 28.52; चन्दनागुरुकाष्ठानि समाजह्रुरितस्ततः Rāmā. vi. App. I. 70(13); (गुडधेनुं प्रवक्ष्यामि) …अस्याः…शृङ्गे त्वगुरुकाष्ठेन (प्रकल्पयेत्) VarāP. 102.4; देयाद्धूपं विशेषतः … चन्दनागुरुकाष्ठाद्यम् S'ivaP. vii. 33.44 (540A.14)

**अगुरुकाष्ठक** (agurukāṣṭha-ka) *adj.* made of aloe wood घृतधेनुं प्रवक्ष्यामि…सौवर्णे चाक्षिणी कार्ये शृङ्गे चागुरुकाष्ठके BhaviP. 835A.32 (iv. 154.3)

**अगुरुकृत** (aguru-kṛta) *adj.* made or prepared out of aloe wood (संसेवेत) लेपश्चन्दनकुङ्कुमागुरुकृतं रूक्षं कटूष्णं लघु BhāvPra.(Bhā.) 5.353.

**अगुरुक्षोद** (aguru-kṣoda) *m.* paste of aloe wood अष्टमं त्वगुरुक्षोदैरालिखेत् फलकापुटे TantrRā. 20.69 (comm. अगुरुक्षोदैः अगुरुपङ्कैः)

**अगुरुगन्ध** (aguru-gandha) *m.* the fragrance of aloe wood उत्तराश्वगुरुगन्धाः। (स्नाने) शस्ताः YogYā. 7.11; *adj.* having the fragrance of aloe wood तमालागुरुगन्धानां चन्दनानां वनानि च। भ्रमरैरुपगीतानि VāyuP. i. 45.31.

**अगुरुगन्धक** (agurugandha-ka) *adj.* having the odour of aloe wood क्षत्रियोऽगुरुगन्धकः…वाजी AsvaCi. 2.8 = S'ārṅgaP. 1613.

**अगुरुगन्धिन्** (agurugandh-in) *adj.* having the fragrance of aloe wood (धनुः) अर्चितं विविधैर्गन्धैर्धूपैश्चागरुगन्धिभिः (v. l. अगुरुगन्धिभिः) Rāmā. i. 750*(1); हेमजालाक्षनिर्गच्छद्धूमेनागुरुगन्धिना। पाण्डुरेण प्रतिच्छन्नमार्गे यान्ति सुरप्रियाः BhāgP. viii. 15.19.

**अगुरुगवी** (aguru-gavī) *f.* a cow not belonging to the teacher गणानासामुपतिष्ठेतागुरुगवीनाम् ĀsvaGS. ii. 10.8.

**अगुरुगुण** (aguru-guṇa) *m.* the characteristics of Agallochum or aloe wood गुरु स्निग्धम्…विमर्दसहमित्यगुरुगुणाः ArthS'ā. i. 189.4 (2.11)

**अगुरुचतुष्क** (aguru-catuṣka) *n.* four consecutive short syllables अगुरुचतुष्कं भवति गुरू द्वौ।…शशिवदनासौ S'rutaBo. 8.

**अगुरुचन्दनाक्त** (agurucandanākta) *adj.* mixed with (the fragrance of) aloe wood and sandal wood अगुरुचन्दनाक्तेन वायुना सुरभीकृते। … बहुमूर्तीः संविधाय…पुनश्चकार शृङ्गारम् BrahmVaiP. iv. 28.102.

**अगुरुचन्दनैधस्** (agurucandanaidhas) *adj.* having the fuel of aloe and sandal wood स्वजनस्ताम् (इन्दुमतीम्)…। विससर्ज…अनलायागुरुचन्दनैधसे RaghuVa. 8.71.

**अगुरुचित** (aguru-cita) *adj.* [*f.* -ā] full of aloe trees इति वनमभितो विहृत्य खेदादगुरुचितायति साधुनीपयोगात् RāghPāṇ.(Dha.) 15.33.

**अगुरुचित्त** (aguru-citta) *adj.* [*f.* -ā] light-minded, not possessed of a stout heart स्त्रीत्वादगुरुचित्ताहं स्वभर्तृश्लाघनापरा ViṣṇuP. v. 30.75; BrahmP. 203.68.

**अगुरुच्छिदा** (aguruc-chidā) *f.* a small piece of aloe wood वीक्ष्य संघम्…यः कलिमैशकमात्रतामगात्। तद्विधातनकृतेऽगुरुच्छिदाधूमधूममथ स व्यपश्चयत् VasaViKā. 10.79.

**अगुरुज** (aguru-ja) *adj.* produced from aloe wood शीतं प्रशमयन्त्याशु धूपाश्चागुरुजा घनाः CaraS. vi. 3.269 (1941 Ed.); घनश्चागुरुजो धूमः AṣṭāSaṁ. ii. 49.9 (4.9); ii. 12.2 (4.2); धातुचन्दनकर्पूरकुङ्कुमागुरुजैः रसैः। … यन्त्रमेतल्लिखेत्पटे AhirbuS. 26.4.

**अगुरुजनित** (aguru-janita) *adj.* [*f.* -ā] (smoke or vapour) arising from Agallochum घनश्यामा भ्राम्यत्युपरि हरिहर्म्यस्य … अगुरुजनिता धूमलतिका HaṁsDū.(Rū.) 45.

**अगुरुतरु** (aguru-taru) *m.* the (fragrant) aloe tree पाथोद प्रशमं नयागुरुतरोरेतस्य दाहज्वरम् S'ārṅgaPa. 1001; दिक्चक्रमामोदयन्नामूलं परिदह्यतेऽगुरुतरुः PadyaVe. 670.

**अगुरुतल्प** (a-gurutalpa) *m.* (intercourse with) the wife of other than the teacher नागुरुतल्पे पततीत्येके ĀpaDS. i(7). 21.10 = HirS'S. xxvi. 6.40 (comm. गुरुदारव्यतिरेकेण परतल्पगमने पातित्यं नास्तीत्येके मन्यन्ते)

**अगुरुतल्पम्** (a-gurutalpam) *adv.* except by violating the teacher's bed न स्त्रीष्वगुरुतल्पं पततीत्येके GautDS. iii. 3.8; Aparā. 1045.27 (*on* 3.227)

**अगुरुता** (a-gurutā) *f.* **A** lightness, insignificance लटहैर्युवतिकटाक्षैर्गाढमगुरुतां जनः स्वयं नीतः YaśasCam. i. 113.7; **B** non-prolixity, absence of manifoldness of assumptions, parsimony विषयितात्वस्य संयोगत्वाद्यपेक्षया आधेयतात्वाद्यपेक्षया चागुरुतया किंधर्मावच्छिन्ने शक्तिः कल्प्यते इत्यत्र विनिगमकं दुर्लभम् VyutpaVā. 130.19.

**अगुरुतिलक** (aguru-tilaka) *m.* **1** a decorative mark on the forehead made with aloe-paste कामिनीव…रुचिरागुरुतिलकभूषिता…विन्ध्याटवी नाम Kād. 19.23; **2** the aloe tree and the *tilaka* tree (*Clerodendrum phlomoides*), Kād. 19.23.

**अगुरुतिलकलाञ्छन** (agurutilaka-lāñchana) *n.* the *tilaka* mark made with aloe-paste अगुरुतिलकलाञ्छनं वहन्ती…ललाटचन्द्रलेखा Nalābhyu. 6.37.

**अगुरुतुल्यगन्धता** (agurutulyagandha-tā) *f.* the state of smelling like aloe-paste नवाम्बुसिक्तावनिपत्रकुङ्कुमद्विपेन्द्रदानागुरुतुल्यगन्धता BṛSaṁ. 69.16.

**अगुरुतोय** (aguru-toya) *n.* water perfumed with the paste or essence of aloe wood कर्पूरागुरुतोयेन स्वच्छतोयेन यत् फलम्। विलेपनैश्च गन्धाढ्यैर्विलेपनफलं लभेत् BhaviP. 225B.31 (i. 152.12); कर्पूरागुरुतोयेन योऽर्कं स्नापयते सकृत्। …सः…रविमाव्रजेत् BhaviP. 243A.9 (i. 163.23)

**अगुरुत्व** (aguru-tva) *n.* non-heaviness, lightness लाघवमगुरुत्वम् Aparā. 977.15 (*on* 3.75) = Nyāyāmṛ. 552A.2 (*on* 2.15); 552A.5 (*on* 2.15); AdvaiSi. 792.11.

**अगुरुत्वच्** (aguru-tvac) *f.* bark of the aloe tree (पुस्तिका ?) ताडिता जलपत्रे च अथ वा चागुरुत्वचि। एत्याः(?) पत्रकृते मानं भूर्जे मानं न विद्यते BhaviP. 328A.27 (ii(1). 7.105)

**अगुरुदहन** (aguru-dahana) *n.* burning of the aloe wood यत्र च … अगुरुदहनशालाजिरेषु मलीमसमुखत्वम् YaśasCam. ii. 247.10.

**अगुरुदारु** (aguru-dāru) *m. n.* aloe wood स्वामिनः शिबिकां शक्रः साधूनां शिबिकां सुराः। उद्धृत्य निन्युः श्रीखण्डागुरुदारुचितां चिताम् PārśvC 8.382.

**अगुरुदाहिन्** (agurn-dāhin) *adj.* who has burnt aloe wood (स कालागुरु दग्ध्वा…। विक्रीयाङ्गारमूल्येन तच्चागत्य ततो गृहम्। तदेव कौशलं शंसन स ययौ लोकहास्यताम्।) कथितोऽगुरुदाहीव: KathāSaSāg. x. 5.7.

**अगुरुदिग्ध** (aguru-digdha) *adj.* besmeared with aloe-paste चन्दनागरु (v. l. °गुरु) दिग्धेषु…। नोरःसु यावत्…महेष्वः। … निपात्यन्ते तावच्छाम्यतु वैशसम् MahāBhā. v. 124.10.

**अगुरुदिग्धाङ्ग** (agurudigdhāṅga) *adj.* [*f.* -ī] whose body is smeared or anointed with aloe-paste शयने प्रमदाम् … आलिङ्ग्यागुरुदिग्धाङ्गीं सुप्यात् समदमन्मथः CaraS. i. 6.17 (1941 Ed.); शीते … आलिङ्ग्यागुरुदिग्धाङ्गीं स्वप्याद् यौवनशालिनीम् SiddhYo. 81.44; चन्दनागुरुदिग्धाङ्गो राजमानो मुनीश्वरः PadmP. ii. 103.109.

**अगुरुद्रव** (aguru-drava) *m.* aloe-paste, essence of aloe अगुरुद्रवकस्तूरीचन्द्रकुङ्कुमचर्चिता। भित्तिः PadmP. iv. 110.10; आघ्राय कण्ठमगुरुद्रवरञ्जितं ते S'ṛṅgāBhū. 23.

**अगुरुद्रुम** (aguru-druma) *m.* **1** the aloe tree, *Amyris agallocha* or *Aqularia agallocha* मन्द्रनाथः … उपागतः। … मेधश्यामं च तं देशं द्रुमखण्डैरनेकशः।…बीजपूरैः सकर्पूरैर्गुरुभिश्चागुरुद्रुमैः MatsyaP. 118.20; इत्यनेकगुणेऽप्यस्मिन् दोषोऽस्त्येको महान् गिरौ। यत् पर्यन्तगतान् धत्ते गुरुरप्यगुरुद्रुमान् MahāP. 32.127; ViśvaPra. 175.20; AnekāSa. 301; **2** (a-gurudruma) a light or small tree, MahāP. 32.127.

**अगुरुद्वितय** (aguru-dvitaya) *n.* the two varieties of aloe wood (viz. *Amyris agallocha* and *Aqularia agallocha*) चन्द्रकुङ्कुमकाश्मीरमुशीरं चन्दनं तथा। अगुरुद्वितयं चैव चूर्णयित्वा तु सूक्ष्मतः। क्षिपेद् भस्मनि तच्चूर्णम् PadmP. iv. 104.53.

**अगुरुधूप** (aguru-dhūpa) *m.* incense of (the resin of) aloe wood सः